## तिसृभ्यो जसः । (१६६/३७१३)

तिसृभ्य उत्तरस्य जसोऽन्त उदात्तो भवति । तिस्रस्तिष्ठन्ति । '[1]उदात्तस्वरितयोर्यणः [2]स्वरितोऽनुदात्तस्य' (८.२.४/३६५७) इत्यस्यापवादः । शसि 'उदात्तयणो हल्पूर्वात्' (६.१.१७४/३७२०) इति सिद्धे[3]ऽन्यत्र बहुवचने 'षट्त्रिचतुर्भ्यो हलादिः' (६.१.१७९/३७२५) इति विधानात् जस् एव लभ्यते इति जस्ग्रहणमुपसर्जनार्थमेके इच्छन्ति अतितिस्रौ इत्यत्र[4] स्वरो मा भूत् इति ॥

## चतुरः शसि । (१६७/३६८२)

चतुरः शसि परतो[5]ऽन्त उदात्तो भवति । चतुरः [6]पश्य । चतस्रादेशे[7] [8]आद्युदात्तनिपातनाद् यणादेशस्य च पूर्वविधौ [9]स्थानिवत्त्वादयं स्वरो न भवति चतस्रः पश्य इति ॥

## सावेकाचस्तृतीयादिर्विभक्तिः । (१६८/३७१४)

सौ इति सप्तमीबहुवचनस्य सुशब्दस्य ग्रहणम् । तत्र [10]सौ य एकाच् तस्मात् परा तृतीयादिर्विभक्तिरुदात्ता भवति । वाचा । वाग्भ्याम् । वाग्भिः । वाग्भ्यः । याता । याद्भ्याम् । याद्भिः । सौ इति किम् ? राज्ञा । राज्ञे । [11]एकाचः इति किम् ? [12]हरिणा । गिरिणा । [13]राजसु । तृतीयादिः इति किम् ? वाचौ । वाचः । विभक्तिः इति किम् ? वाक्तरा । वाक्तमा । सप्तमी[14]बहुवचनस्य ग्रहणादिह न भवति त्वया, त्वयि इति ॥

## अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे । (१६९/३७१८)

एकाचः इति वर्तते, तृतीयादिर्विभक्तिरिति च[15] । नित्यशब्दः स्वर्यते, तेन नित्याधिकारविहितः समासः पर्युदस्यते । नित्यसमासादन्य[16]त्रानित्यसमासे यदुत्तरपदमन्तोदात्तमेकाच्च तस्मात् [17]परा तृतीयादिर्विभक्तिरन्यतरस्याम् उदात्ता भवति । परमवाचा, परमवाचा । परमवाचे, परमवाचे । परमत्वचा, परमत्वचा । परमत्वचे, परमत्वचे । यदा विभक्तिरुदात्ता न भवति, तदा[18] समासान्तोदात्तत्वमेव । अन्तोदात्तात् इति किम्? [19]अवाचा । [20]सुवाचा । सुत्वचा । तत्पुरुषोऽयम् । [21]तत्र 'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्यय' (६.२.२/३७३६) इति पूर्वपदप्रकृतिस्वरः । उत्तरपदग्रहणमेकाच्त्वेनोत्तरपदं विशेषयितुम्, अन्यथा हि समासविशेषणमेतत् स्यात् । तत्र शुनः ऊर्क्, श्वोर्जा इत्यत्रैवायं विधिः स्यात् । अनित्यसमासे इति किम्? अग्निचिता । सोमसुता । 'उपपदमतिङ्'(२.२.१९/७८२) इत्ययं नित्याधिकारे समासो विधीयते । तत्र 'गतिकारकोपपदात् कृत्' (६.२.१३९/३८७३) इत्युत्तरपदप्रकृतिस्वरेण चित्शब्दः उदात्तः । यस्तु विग्रहाभावेन नित्यसमासस्तत्र भवत्येव विकल्पः, अवाचा ब्राह्मणेन, सुवाचा ब्राह्मणेन इति । बहुव्रीहौ 'नञ्सुभ्याम्' (६.२.१७२/३९०६) इत्युत्तरपदान्तोदात्तत्वं [22]भवति ॥

---

1. अचिर ऋतः इत्यधिकम् ब. 2. स्वरितान्तोदात्तस्य क.फ.ह. 3. अन्यत्राजादौ इत्यादौ तु ड. 4. अत्र नास्ति फ. 5. अन्तः नास्ति फ. 6. देहि ग. 7. कृते इत्यधिकम् ग.ह. 8. आद्युदात्तत्वनिपातनात् ग. 9. स्थानिवद्भावात् फ. ह. 10. सौ नास्ति फ. 11. वाक्यमिदं नास्ति फ. 12. किरिणा फ. ह. 13. राजसु नास्ति ड. 14. बहुवचनग्रहणादिह फ. 15. वर्तते इत्यधिकम् ब. 16. अन्यस्मिन् समासे ब. 17. परतः ब. 18. पक्षे इत्यधिकम् क. 19. अवाचा नास्ति फ. 20. सुवाचा नास्ति ह. 21. वाक्यमिदं नास्ति फ. 22. भवति नास्ति फ.